International Journal of Sanskrit Research 2021; 7(1): 383-386

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 383-386
© 2021 IJSR
www.anantaajournal.com
Received: 03-10-2020
Accepted: 25-12-2020

**Ranjit Bagdi**
Ph.D. Research Scholar, Patna University, Bihar, India

**Corresponding Author:**
**Ranjit Bagdi**
Ph.D. Research Scholar, Patna University, Bihar, India

# संस्कृतं भारतवर्षस्य ऐश्वर्यम्

**Ranjit Bagdi**

## प्रस्तावना:

देवतानां भाषा संस्कृतभाषा। संस्कृतं नाम देवी वाक्। संस्कृत भाषया विरचिता वेदाः ते सर्वे प्राचीनभारतवर्षस्य। अपि च संस्कृतस्य ऐश्वर्यम्। विश्वस्य प्राचीनतमभाषासु अन्यतमा, निरवद्या, मनोहरा साहित्य-काव्य-कोष-दर्शन-आकरणादि हि संस्कृतभाषा विश्वस्यैव अन्यतमा श्रेष्ठा भाषा। देवभाषा संस्कृतभाषायामेव वैदिकसाहित्य-रामायण-महाभारत पुराणानि रचितानि। भासाश्वघोष-कालिदास-भारवि-माघ-श्रीहर्ष-भवभूति प्रभृतिभिः निवद्धानि सुप्रसिद्ध नाटक काव्यादीनि संस्कृतभाषयैव विरचितानि। अपि च भारत-भामह दण्डी-वामनानन्दवर्धन-मम्मट-विश्वनाथ-जगन्नाथ प्रमुखैः अलंकारशास्त्राणि च संस्कृतेन विरचितानि। संस्कृते किं वा अस्ति? इति वहवः संस्कृतविद्यार्थिनः पृच्छन्ति। पाणिनि-कात्यायन-पतञ्जलि प्रमुखानां आकरणशास्त्राणां कपिल-कणाद-गौतम-जैमिनि-वादरायणादि प्रणीतानां सांख्यायोगादीनां दर्शनशास्त्रणां भाषा अपि संस्कृतभाषामेव विरचितानि। अर्थशास्त्र-कामन्दकीपनीति-कामशास्त्र प्रभृतीनां ग्रन्थआनामपि संस्कृतमेव।

## संस्कृते किं नास्ति?

संस्कृतछात्रस्य प्रश्नं कर्तुं सामर्थ्यं न भवति। अतः संस्कृतस्य एतादृशी स्थितिः। संस्कृतभाषा अधुन्यपि हिन्दु धर्मस्य जातकर्म-विवाह-श्रद्धादि-सर्वकार्याणां भाषा संस्कृतभाषा। अतीव समृद्धा सुमधूरा ऐश्वर्यमयीयं भाषा देवभाषा इति। संस्कृतभाषायाम् उच्यते च –

"यद् भूतं यच्च भाव्यं हि लोकेऽस्मिन् यद् ग्रहेलिमम्।
यद् भूत्यै भारतस्यास्ते तत् सर्वं संस्कृते स्थितम्॥" इति।

तदारम्भ्य अद्य यावत् याः याः शिक्षाः यानि यानि ज्ञानविज्ञानि सन्ति ताः ताः शिक्षा तानि तानि ज्ञानविज्ञानानि अस्यां भाषायां सन्निहितानि सन्ति। अतः अतिसूक्ष्म भावानां स्पष्टीकरण विषये संस्कृतं विना नैव समर्थो भववितुमर्हति। संस्कृतं भारतीयसंस्कृतेः आत्मा इति उच्यते। संस्कृतभाषाया माध्यमेन भारतीय-संस्कृतिः सुप्रतिष्टिता अस्ति।
भारतीय सर्वस्वं विश्वस्य समग्रं तत्त्वं चास्यां सम्बद्धमस्ति। संस्कृतिमूलं संस्कृतम्। साहित्यं संस्कृतिवाहकमस्ति। एषा संस्कृतिः न केवलं भारतदेशस्य मुकुटायमानाहस्ति। बालकस्य जननादारभ्य क्रियमाणः जातकर्म-नामकरण-अन्नप्राशनदिषाऽशसंस्काराः संस्कृतभाषया विधीयन्ते। संस्कृतभाषायामेव पूजापाठः यज्ञयागादिक्रियाश्च प्रचलन्ति।

अस्माकं देशस्य विशिष्ट-पुरुषाणां विचाराः वेशभूषाः कार्यानि आचाराः यथा – तिलकधारणम्, शिक्षासंस्थापननम् अस्माकं देवभाषा-संस्कृतौ अलर्भवन्ति। अतः वक्तुं शक्यते यत् संस्कृतिः संस्कृत अनयोर्मध्ये घनिष्ठतरः सम्बन्धः वर्तते। संस्कृतेः संरक्षणाय संस्कृतभाषा अतीव अवश्यकं वर्तते। अस्माकं सभ्यता-आचार-आचारणं-संस्कृतिश्च संस्कृतग्रन्थेषु एव परिलक्ष्यते। संस्कृतेन सह संस्कृतेः सम्बन्धः यदि विच्छिन्नो भवति। तर्हि भारतीयसंस्कृतेः संरक्षणं न सम्भवति।

अतः उच्यते यत् –

"संस्कृतेन सुसम्पन्नं भारतं भारतमुच्यते।
संस्कृतेन विना देशः केवलं चेण्डियोच्यते॥" इति

संस्कृतं ज्ञानस्य विज्ञानस्य च भाण्डागारम्। माता पित्रोः पूजनं, गुरुसर्वे देवतार्चनं गृहस्थानामतिथि सेवा, नारीणां पातिव्रत्यम् विनयानुशीलनं सर्वाण्येव आचरणानि भारतसंस्कृते रङ्भूतानि। संस्कृतं विना भारतसंस्कृतेः अस्तित्वं अचित्तनीयम्। संस्कृतभाषा सर्वासां भाषाणां जननी अस्ति। इयं भाषा देववाणी, गीर्वाणी सुरभारती इति अनेन भावेन ज्ञायते।

महर्षिकृष्णद्वैपायनविरचितः लक्षश्लोकात्मकः विशालो ग्रन्थः पञ्चमवेदरूपः महाभारतम् इति संस्कृतस्य ऐश्वर्य्यम्। "महत्त्वाद् भारवत्वाच्य महाभरतमित्युच्यते।" तत्रैव भीष्मपर्वणि अर्जुनमुद्दिश्य भगवतः श्रीकृष्णस्य मुखात् निःसृता निगदिता चासीत् सर्वोपनिषदसारभता सुधामृतस्यन्दिनी गीता। पवित्र धर्मशास्त्रः गौतौ संस्कृतस्य ऐश्वर्य्यम्।

## संस्कृत भाषायाः महिमा

संस्कृतभाषा तु संस्कारयुक्ता भाषा। अस्याः भाषायाः क्वचिदपि दोषदुर्बलता शास्त्रदृष्ट्या नास्ति। अतः मार्जितेयं भाषा। सत्यभुक्तम् - "भाषासु मुख्यासुरभारतीयम्"। अपि च संस्कृतं नाम दैवी वागत्वाख्याता महर्षिभिः। रामायण-महाभारतकाले संस्कृतभाषा आसीत् जनसाधारणस्य भाषा। डॉ. भण्डारकरमहोदयैः प्रमाणीकृतं यद् ईशवीयपूर्वद्वितीयशताब्द्यां भारतस्यापि पञ्चप्रदेशस्य लोकभाषा संस्कृतमासीत्। तदानीन्तनसमासे सर्वेषां संस्कृतज्ञानम् आसीत्। भारतवर्षे संस्कृतवृक्षस्य मूलं सदैव सुदृढम् अस्ति। तथा हि –

"यावद् भारतवर्षं स्यात् यावत् विन्ध्याहि मालयौ।
यावद् गङ्गा च गौदा च तावदेव हि संस्कृतम्॥"

## संस्कृतराष्ट्रभाषायाः ऐश्वर्यम्

समग्रभारतवर्षे संस्कृतस्य महत्त्वं सर्वथा स्वीकार्यम्। संस्कृतग्रन्थाः न केवलं भारतवर्षे आद्रियन्ते। परं समग्रपृथिव्यां सर्वदेशेषु एतेषां समादरः वर्तते। साम्प्रतं स्वतन्त्रभारतभूखण्डे हिन्दीति राष्ट्रभाषापदवीं जाग्राह। किन्तु वङ्गेषु असमप्रदेशेषु उत्कलेषु दाक्षिणात्येषु केरलप्रभृतिदेशेषु च हिन्दीभाषायाः प्रसारः न समजनि। किन्तु बाहुल्येन आङ्गलभाषायाः प्रभावः दृश्यते। किन्तु विदेशीयभाषया राष्ट्रियचेतना न समुन्मिषिता स्यात्। तेन च स्वदेशस्य माध्यमेन राष्ट्रियसंहतेः दृढीकरणं यथा सम्भवेत् राष्ट्रभाषा संस्कृतम् इति करणेन भारतवर्षस्य च गौरववर्द्धनं सम्पायिष्यते सर्वजनैः भारतीयैः इति दिक्

अतः संस्कृतस्य उन्नतये छात्राः शिक्षकाः प्रकाशकाः राजनीतिमुख्याश्च सर्वेऽपि याजशीलाः भवेयुः। यतः संस्कृतम् अस्माकं गौरवम्। अस्माकं संस्कृतस्य ऐश्वर्यम्। संस्कृतं विहाय भारतस्य गौरवं न परिकल्प्यते।

भूगर्भशास्त्रम्

संस्कृतभाषायां तु आप्राचीनकालतः व्यवहारः 'भूगोलम्' इति। गोलपरिभाषायाम् उच्यते–

"मृदम्बग्न्यनिलाकाशपिण्डोऽयं पाञ्चभौतिकः
कपित्थफलवद्वृन्तः सर्वकेन्द्रे खिलाश्रयः॥
स्थिरः परेशशकत्येव सर्वगोलादधः स्थितः।
मध्ये समन्तादण्डस्य भूगोलो ओम्नि तिष्ठति॥"

भूमिः पञ्चभूतात्मिका कपित्थफलाकारिका च इति अत्र स्पष्टतया निरूपितं वर्तते। 'भूकेन्द्रं' प्रति सर्वम् आकृष्टं भवति। अन्यत् किमपि अनाश्रित्य आकर्षणशक्त्या निरालम्बा भूमिः औम्नि तिष्ठति इति एतस्मात् श्लोकात् ज्ञायते। आर्यभटः भूव्यासम् अधिकृत्य वदति 'ञिला भूः' इति। तन्नाम भूव्यासः १०५० योजनमितः भवति। (१०५०×१२=१२६००) किलोमीत आधुनिकाः अपि एतत् एव परिमाणं प्रतिपादयन्ति। कालिदासस्य काले भूशास्त्रविज्ञानं कथम् आसीत् इति मेघदूतस्य पठनात् स्फुटीभवति। दिनचलनं वार्षिकचलनम्, अयनं, ग्रहणं, समरात्रम् इत्यादयः बहवः विषयाः अतिप्राचीनकाले एव भारते चर्चिताः आसन्

## संस्कृते गणितम्

आधुनिकगणकयन्त्रम् अपि भारतीया वेदगणितपद्धतिः। शून्यं, दशांशपद्धतिः सङ्ख्याः पै (π) मूल्यम् एव गणितक्षेत्रं प्रविष्टवन्तः।

भास्कराचार्येण लीलावत्याम् –

"तत्कृत्योर्योगपदं कर्णः
दोष्कर्णवर्गयोर्विवरात्।
मूलं कोटिः कोटिश्रुतिकृत्योः
अन्तरात् पदं बाहुः॥ इति उच्यते।

पिङ्गलाचार्यः छन्दः शास्त्रे मेरुप्रस्तारम् अधिकृत्य यत् प्रतिपादयति। तदेव पास्कल्नामकेन अन्विष्टम् इति।

## विमानयानशास्त्रम्

भारद्वाजमहर्षेः यन्त्रसर्वस्वम्। अगस्त्यस्य शक्तिसूत्रम्, ईश्वरस्य सौद्यमिनीकला, भारद्वाजस्यैव अंशुमत्तन्त्रं, शाकटायनस्य वायुतत्त्वप्रकरणं वैश्वमारुततन्त्रं च। नारदस्य धूमप्रकरणम् इत्यादीनां विमानशास्त्रसम्बद्धानां ग्रन्थानाम् उल्लेखः दृश्यते। भोजस्य समराङ्गणसूत्रधारः, शैनकमहर्षे व्योमयानतन्त्रं, गर्गस्य यन्त्रकल्पः नारायणस्य विमानचन्द्रिका इत्यादयः अनेके ग्रन्थाः अपि विमानशास्त्रसम्बद्धाः एव।

## रसशास्त्रम्

रसतन्त्रविषये संस्कृतग्रन्थाः बहवः वर्तन्ते। शिल्परत्नं, विष्णुधर्मोत्तरं, मानससारं, मानसोल्लासं, रससंहिता इत्यादयः रसशास्त्रस्य विविधविषयान् परिलक्ष्यन्ते। चिकित्सा चिकित्सायाम् अपि अस्य रसतन्त्रशास्त्रस्य व्यवहारः आसीत्।

## संस्कृते जीवशास्त्रम्

वृक्षायुर्वेदः गजायुर्वेदः अश्वायुर्वेदः इत्यादयः निरवधिशाखाः जीवशास्त्रस्य अधिकृत्य प्रवृत्ताः। रोगा, तच्चिकित्सा, तेषाम् आहारः इत्यादयः अपि तत्र वर्णिता। गौतमस्य जवायुर्वेदः पालकाव्यस्य हस्त्यायुर्वेदौ च लोके प्रसिद्धौ।

## संस्कृते ज्योतिषग्रन्थाः

भारतीये ज्योतिषशास्त्रे असंख्या ग्रहाः वर्तन्ते। अन्यसौरमण्डलानि अपि भवितुम् अर्हन्ति इत्यादयः विचाराः भारतीये ज्योतिषशास्त्रे परिलक्ष्यन्ते। ग्रहणस्वरूपम्, ग्रहणां स्थिति, परस्पराकर्षणम् इत्यादयः अत्र विस्तारेण आलोचिताः। सूर्यादीनां सञ्चारः भ्रममूलः ग्रहणां स्वप्रकाशता नास्ति इत्यादयः बहवः वैज्ञानिकाः अंशाः आर्यभटेन सम्पादिताः।

## वास्तुविद्या

वास्तुविद्या अतिप्राचीना अत्युत्कृष्टा। कर्णाटके वेलूरे विद्यमानः भूमिस्पर्शरहितः स्तम्भः। कोणार्कक्षेत्रस्य सूर्यदेवालयः, शृङ्गारोस्तम्भाः, अनन्तपुरीस्थाः सप्तस्वरप्रभवाः मण्डपाधाराः स्तम्भाः, अजन्ता एल्लोरागुहाः इत्यादयः अनेके अंशाः भारतीयवास्तुविद्यायाः गरिमाणं प्रमाणीकुर्वन्ति। मनुष्यालयचन्द्रिका, सुप्रभेदागमः, वास्तुरत्नावली, बहद्वास्तुमाला इत्यादिषु अनेकेषु ग्रन्थेषु वास्तुशास्त्रं विवरणं अस्ति।

## सङ्गीतशास्त्रम्

सङ्गीतविषये सर्वे जानन्ति एव। चिकित्सार्थम् अपि सङ्गीतं व्यवहारं क्रियते। सङ्गीतचिकित्सारत्नाकरः नामकः ग्रन्थः ३४८०० रोगाणां विषये विस्तारेण उक्ताः। नलन्दातक्षशिलासदृशाः विश्वविद्यालयाः पुनरपि भवन्तु इति मम अभिलाषः।
सर्वे संस्कृतज्ञाः एकैकशास्त्रस्य ज्ञानं भवतु। तत्तच्छास्त्रस्य ज्ञानवर्धनं करोतु इति मम चिन्तनम्। जयतु संस्कृतं जयतु भारतम् इति मम अभिलाषः।
भारतसंस्कृतो च आदिकाव्य रामायणस्य स्थानम् अन्यतमम्। वाल्मीकिविरचितमिदं रामायणं विश्वविश्रूतं भवति। रामश्चात्र भगवानन्तोऽसीमः परं ब्रह्म च तथा सीता भगवती नारायणो इति नान्मा अभिधियते। अधुनापि भारतभूखण्डे आपामरजनानां कण्ठे महाभारते तथा रामायणं सश्रद्धं क्रिया-कर्मे व्रतकर्मसु पापठ्यते। तथैव वेदव्यासरचितानि पुराणानि भारतैराश्चर्य्यं रन्तानि कल्पते एव।
संस्कृतस्य ऐश्वर्यं महाकविकालिदास-रचितं काव्यशास्त्र द्वयं नाटकत्रयञ्च च। शतसहस्राणि एतानि काव्यशास्त्राणि विलसन्ति वहुकविविरचितानि अलङ्कारचिन्तनं छन्दोविचितिविश्लेषणं रीतिगुणसमीमणं च भूरिशः भूयिष्ठं क्रियते।

## उपसंहारम्

ज्ञानं, विज्ञानं, समाजशास्त्रं, दर्शनं इत्यादयः सर्वे सामाजिका वैज्ञानिकाः ग्रन्था संस्कृतभाषायां सन्ति। अस्माकं जीवने जन्मतः मृत्यु पर्यन्तं षोडशसंस्काराः संस्कृतदेवभायामेव सम्पन्नो भवन्ति। तथैव इतिहासग्रन्थाः, गणितग्रन्थाः, ज्यामित्रिकशास्त्राणि, आयूर्वेदशास्त्राणि, राजनीतिशास्त्राणि, सूपशास्त्राणि शिल्पशास्त्राणि, वास्तुविद्याग्रन्थाः, ज्योतिषग्रन्थाः विमानयानवाहनादिविवेचनग्रन्थाः, रसायनशास्त्राणि, अर्थशास्त्रम्, इत्यादयः संस्कृतदेवभाषया विरचितानि दृश्यन्ते। एतानि संस्कृतं भारतवर्षस्य ऐश्वर्यरूपाणि भवन्ति।

## सन्दर्भग्रन्थसूची

1. सिंह डा. शर्मा "संस्कृतशिक्षणम्" भारतमूद्रा प्रकाशन, केरला, मुद्रणम्-1996.
2. आचार्य रामशकल पाण्डेय "संस्कृतशिक्षणम्" विनोद पुस्तक मन्दिर, आग्रा, मुद्रणम्-1995.

3. डा. कमलकृष्ण चक्रवर्ती "संस्कृतमञ्जरी" वाणी प्रकाशन, कोलकाता, मुद्रणम्-2009.
4. श्री अशोककुमारवन्दोपाध्याय "आदर्श संस्कृत पाठमाला" सुरभि सदेश, कोलकाता, प्रथमसंस्करणम्-1413.
5. डा. कानाल नलचक्रवर्ति "संस्कृताध्यापनम्" विनोद पुस्तक मन्दिर, आग्रा, मुद्रणम्-1996.
6. डाँ. जगदीशराज शर्मा "संस्कृतशिक्षणम्" मानवी प्रकाशन, जम्वु, मुद्रणम्-2005.
7. डाँ.युधिष्ठिर गोप "वैदिक साहित्येर" इतिहास संस्कृत वुक डिपो, कोलकाता, मुद्रणम्-2018।
8. डाँ देवकुमार दासः संस्कृतसाहित्येर इतिहास सदेश प्रकाशन्, कोलकाता, दशमसंस्करणम्-1418.